This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीरामः
श्रीशिवः

श्रीगणेशाय नमः ॥ कृष्णानन्दं गुरुं नत्वा परमानन्दमद्वयम् । वन्द्ये वेदांतसारस्य टीकां नाम्नानुबो-
धिनीम् ॥ इह खलु कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतसकलवेदराशीनां दिन्मात्रा अप्यतद्रूपा
द्रूपानन्दविषयानाद्यनिर्वचनीयभावरूपाज्ञानविजृम्भितानन्तभवानुष्ठितकाम्यनिषिद्धवर्जितनित्य
नैमित्तिकप्रायश्चित्तोपासनाकर्मभिः । सम्यक्प्रसन्नेश्वरानुग्रहविशिष्टकृपावरणादिसंघर्षितादर्शतलवदति
निर्मलान्तःकरणानां नलिनीदलगतजलबिंदुवच्चिरस्थायिगर्भादिस्तंबपर्यंतं जीवजातं स्वात्मवन्मत्वा परश्वां
नर्गतं दारुणभंगुरं तापत्रयाग्निसंदह्यमानमनिशमात्मन्यनुपश्यतां । अतिविवेकिनामत एव ऐहि
कस्रक्चन्दनादिविषयभोगेभ्यः आब्रह्मलोकहैरण्यगर्भोपभोगेभ्यश्च वान्ताशनवदत्यन्तनिर्विण्णमान
सानां शमादिसाधनसंपन्नानामापाततोधिगताखिलवेदार्थत्वाद्देहाद्यहंकारपर्यंतं जडपदार्थतच्छेतनान्तःकरणस्वप्र
काशस्वरूपे प्रत्यगात्मनि अपरिच्छिन्नानन्दत्वे संशयापन्नानां जिज्ञासूनां श्रवणेन मन्तानानिच्छन्तिपरमानन्दा

श्रीरामः
श्रीशिवः

वाप्तिसिद्धये प्रकरणमारभमाणः समाप्तिप्रचयगमनादिफलकशिष्टाचारपरिप्राप्तेष्टदेवतानमस्कारलक्षणं
मंगलाचरणस्यावश्यकर्तव्यतां प्रदर्शयन् नन्तरमनुबन्धचतुष्टयं निरूपयन् परमात्मानं नमस्कुरुते ।
॥ अखण्डमित्यादिना । अभीष्टस्य सिद्धिः श्रेयसः सिद्धये प्राप्त्यर्थमात्मानमाश्रये । एकत्वे प्रतिपाद्यमित्यर्थः ॥ नन्वे
विषयस्यात्मनः कथं प्रतिपत्तिरित्याशंक्याह । अखिलाधारमिति । अखिलस्य नानारूपस्य प्रपंचस्य
विवर्ताधिष्ठानकत्वेन कारणत्वात् कृते प्रत्यैव प्रतिपाद्यत्वं न तु शून्यमित्यर्थः ॥ नन्वेवं सति प्रतिविषयत्वे
न दृश्यत्वापत्तिमाशंक्याह । अवाङ्मनसगोचरमिति । यतो वाचो निवर्तन्ते इत्यादि श्रुतिभिर्न विषयत्व
प्रतिपादनात् । प्रतिपत्तिविषयत्वं कारणत्वोपलक्षितं प्रत्यग्विषयत्वे नौपचारिकमिति भावः ॥ नन्वे
वमपि कारणत्वे मृत्तिकावदनित्यत्वशंकामपहरन्नाह । सदिति । नाशाभावोपलक्षितं स्वरूपम् । सदेव सो
म्येदमग्र इत्यादिश्रुतेः ॥ ननु तथापि जडत्वापत्तिमाशंक्याह । चिदिति । स्वप्रकाशत्वेनास्य स्वरूपमिति भावः ॥ ॥

Checked 2012

Accession No.
~~10239~~ M1331
Title:- मुनित्रयादि व्याख्यान
पेजे :- (15)

KKSU LIBRARY
RAMTEK
441 106
M-1331
Dist Nagpur

(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
श्रीशिव।

२ ननु तथाप्युक्तार्थस्याविदितत्वात्किमित्याप्रतीयमित्याशंक्याह। आनन्दमिति। परमानन्दरूपमित्यर्थः। ननु प
रिच्छिन्नेपि नेत्युनेन रागतो व्याविदितित्या येन प्रपंचस्यापि विज्ञानव्यतिरिक्तस्य प्रतीयमानत्वात्कथमद्वैत
सिद्धिरित्याशंक्यां तत्त्वं गुणीकुर्वन्नाह। अखण्डमिति। सजातीयविजातीयस्वगतभेदशून्यमित्यर्थः। अत्र स
ङ्गिरानन्दमिति प्रयोजनं। अखण्डमिति विषयः। शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः संबंधस्तत्का
मोधिकारी स्यादनुबंधचतुष्टयमर्थादुक्तं भवति। किंच। यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्
थाः प्रकाशंते महात्मन इत्यादिश्रुत्या गुरुनमस्कारस्य शास्त्रांगत्वप्रतिपादनान्नमस्कारो विघ्नध्वंसेन कार्य इति तन्नतिरू
पं कमभिधेयग्रंथं प्रति। त्वापिनाडिप्यरूपित्यादि यतं सामान्यं न यथाच्छिद्यते। ननु केवलस्याद्वैतस्यार्थतः शब्दतरेवाति
अद्वयानंदानन्तगुरूनाराध्य वेदान्तसारं यथामति वक्ष्ये इत्यन्वयः। अद्वयाश्च ते आनंदाश्च अद्वयानन्दास्तानद्वयान
न्दानन्तगुरूनित्याह। अतीतद्वैतभानानदति। अतीतं गतं द्वैतभानं यतस्मादतीतद्वैतभानाः। निरस्तसमस्तभेदज्ञान

श्रीराम।
श्रीशिव।

नानन्दगुरूनाराध्य कायवाङ्मनोभिर्नमस्कारगोचरीकृत्य वेदान्तसारं वेदान्तानामुपनिषद्वाक्यजातानां मध्ये यत्सारं सिद्धान्तरहस्यं
यस्मिन्नुक्ते पुनरुक्ततमं नावशिष्यते तं वेदान्तसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये प्रतिपादयिष्ये इत्यर्थः। इदानीं सर्वस्यापि वस्तु
विवादे देशकत्वोक्त्याति शातं वेदान्तं नाम तो निर्दिशति। उपनिषदश्च प्रमाणं उपनिषत्प्रमाणं उपनिषदो यत्र प्रमाणमिति वा
तदुपकारीणि वेदान्तवाक्यसंग्राहकाणि शारीरकसूत्राणीति अथातो ब्रह्मजिज्ञासा इत्यादीनि सूत्राणि आदिशब्देन भगव
द्गीताध्यात्मशास्त्राणि गृह्यन्ते तेषामप्युपनिषद्वाक्यत्वादिति भावः। ननु यद्यप्यवान्तरानुबंधचतुष्टयमापद
न इति निर्दिष्टं तथापि परमानुबंधचतुष्टयस्यापि निरूपितत्वाद् अत्रेत्यावतां प्रवृत्तिर्न स्यादित्यत आह। । वेदान्त
सारस्येत्यर्थः। ननु वेदान्तशास्त्रस्यापि किमनुबंधचतुष्टयं येनास्यापि तद्वत्ताविच्छित्तिरित्याशंक्य अकृत्स्न शास्त्रस्यानुबंधचतुष्टय
मावश्यकत्वमिति। अनुबंधचतुष्टयमेवाह। मन्त्रोपदेशमधिकरणं जनयति। अध्यायो ध्येतव्य इति वचनात्त्रैवर्णिकानामुप
नीतानामध्ययनं नियमेन विधीयते। अध्ययनविधिप्रयुक्तमेवाध्ययनं नाध्यापनविधिप्रयुक्तम्। शिक्षाकल्पव्याकरण
छन्दोज्योतिर्निरुक्ताख्यानि। यतस्तेनापाततोऽधिगताखिलवेदार्थः। अत्र सर्ववेदार्थरहस्यं शोते साति ऽ जन्मान्तरे वेय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
श्रीशिव।

॥४॥ पवित्रतायस्मापाततइत्युक्तम्। नन्वनधीतवेदानामपि विदुरादीनां तत्त्वज्ञानोत्पत्तिदर्शनाध्ययनतत्रयुक्त्यानुष्ठानयो
वर्ण्यमाशंक्योत्तरमाह। जन्मान्तरइति। तेषामाधुनिकाध्ययनाभावेपि जन्मान्तरीयाध्ययनादिनाविनष्टपरिपाकवर्तोमलि
न॰ जन्मनिबिनाप्यध्ययनादिना ज्ञानोत्पत्तौबाधकाभावान्नाध्ययनादिवैयर्थ्यमितिभावः। काम्येति। काम्यस्यापिकर्मणः
धर्मसाधनत्वेपि। पातापातसंपादकत्वेनबंधकत्वान्निषिद्धतद्वर्जनकृतः सत्वमित्युक्तम्। तथाचनित्यादिकर्मानुष्ठा
निं ५ नेननिर्गतोरिवत्वककल्मषतयानिःशेषतोनितरांसकलत्वकल्मषत्वेन। अत्रनिरिवत्वपदंकाम्यनिषिद्धजनितसुखदुःख
रूतपनम्। तेननितांतनिर्मलत्वांतः नितांतंनिर्मलंस्वच्छंस्वांतमन्तःकरणंयस्यसः। तस्योक्तः यन्त्यमाणसाध
नचतुष्टयसंपन्नः प्रमाता। अंतःकरणोप्रतिबिंबितंचैतन्यमित्यर्थः। एतदेवस्पष्टं व्याकरोति। यथातीव्रापा ॥४॥
पुभुक्षाबांभोजनादन्यः व्यापारोमनसोनभवते। भोजनविघ्नंबनसहते। तथास्रक्चंदनादिविषयेष्व
त्यंतमरुचिः। तत्त्वज्ञानसाधनेषुश्रवणमननादिषु अत्यंतमभिरुचिर्यदाजायतेतदापर्यालनाय श्रवणादि
साधनेष्वप्रतीयस्रक्चंदनादिविषयेगम्यमानं मनः। येनांतःकरणावच्छिन्नविशेषेणाभिमुखतेसच्छिन्नविशेषः समइत्यर्थः।

श्रीराम।
श्रीशिव।

इदानींदमस्यलक्षणमाह। साधनं श्रवणादिसाधनेभ्योविलक्षणोशब्दादिविषयेषुप्रवर्तमानानिवाह्येन्द्रियाणि
येनच्छिन्नविशेषेणनिवर्त्तन्तेसदमइत्यर्थः। इदानीमुपरतेर्लक्षणमाह। निगृहीतानामेवतेषांवाह्येन्द्रियाणांश्रव
णादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथानानीन्द्रियाणि सर्वथानगच्छंतितथानेषांनिग्रहोयेनच्छिन्नविशेषेण
क्रियतेसोपरतिरित्यर्थः। विहितानांनित्यादिकर्मणां विधिना चतुर्थाश्रमस्वीकारकर्मणापरित्यागः। नाहंकर्तेत्य
वस्थानमुपरतिरित्यर्थः। तितिक्षालक्षणमाह। शरीरधर्मस्य शीतोष्णादेस्तज्जन्यसुखदुःखादेश्च शरीरस्यत्य
क्तुमशक्यत्वात्स्वप्रकाशचिद्रूपेस्वात्मनिवशीतोष्णादेरत्यंताभावादितिविवेकरूपेणमिथ्याभानस्यशीतोष्णादेर्द्वन्द्वस्य
यत्सहनंसातितिक्षेत्यर्थः। इदानीं समाधानलक्षणमाह। शब्दादिविषयेभ्योनिगृहीतस्यांतःकरणस्यश्रवणा
दौतदनुगुणेषु तदुपकारकेषु अमानित्वादिसाधनविषयेषु समाधिर्नैरन्तर्येणावस्थानं समाधानमित्यर्थः।
श्रद्धादयः स्पष्टार्थाः। तथाचएवोक्तसकलविशेषणविशिष्टः प्रमाताऽधिकारीत्यर्थः। अस्मिन्नर्थेश्रुतिंप्रमाणं
यति। यथोद्देशंविषयंनिरूपयति। अविद्याध्यारोपितसर्वसत्त्वकिंचिज्ज्ञत्वादिविरुद्धधर्मपरित्यागेनावशिष्टं
शुद्धचैतन्यम्॰ तदेवस्वरूपमेवसर्वेषांवेदांतवाक्यानांविषयइत्यर्थः। क्रमप्राप्तंसंबंधंलक्षयति। बोध्यबोधकभावइति

B

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
श्रीशिवः।

॥५॥ बोध्यस्य ब्रह्मात्मैक्यस्वरूपस्य बोधकस्य वेदान्तशास्त्रस्य च बोध्यबोधकभाव एव संबन्ध इत्यर्थः। अवशिष्टं प्रयोजनमाह। ब्रह्मा
त्मैकत्वेनेत्यादिना। अज्ञानतत्कार्यसकलप्रपंचनिवृत्तिः तु नततस्त्वभावरूपा। स्वस्वरूपाखंडानन्दप्राप्तिः फलमित्य
र्थः। ननु लोके प्राप्तस्य क्रियासाध्यस्य स्वर्गादेः पुरुषार्थत्वेन फलत्वं दृष्टम्। अत्र तु नित्यप्राप्तस्यात्मस्वरूपस्याक्रियासाध्य
त्वाभावेन पुरुषार्थत्वाभावात्कथं फलत्वमिति चेन्न। तस्यैव पुरुषार्थत्वे नियमाभावात्। यथा लोके कस्यचिद्विस्मृतकण्ठ
मरोगस्तत्प्रयुक्तशोकाग्निसंदह्यमानस्याप्तोपदेशेन तत्काले स्वकंठगतचामीकरप्राप्तेरपि पुरुषार्थत्वात् फलत्वं दृष्टं
एवमनादिनित्यप्राप्तस्यात्मनः अज्ञानमोहांधकाराच्छन्नत्वेन विस्मृतस्वरूपस्य पुरुषस्य गुरुश्रुतिवाक्यश्रवणाज्ज्ञानेन तम
अज्ञानमोहांधकारनिवृत्तौ सत्यां स्वयंप्रकाशमानचिद्रूपस्यासिद्धस्येवात्मनः फलत्वमुपवर्ण्यत इति भावः। उक्तेर्थे
श्रुतिं प्रमाणयति। अधुना शास्त्रारंभनिमित्ताधिकार्यादिनिरूपणानंतरं शास्त्रारंभं प्रस्तौति। अथवान्वितस्या
धिकारिणः कर्तव्यं दर्शयति। उक्तलक्षणेनान्वितो बुद्धिसंनिहितोऽधिकारी गुरुमुपसर्पतीत्यर्थः। ननु संसारासक्तवि
त्तस्य विषयलोलुपस्यार्त्तिरहितस्य गुरूपसर्पणमयुक्तमित्याशंक्याह। संसारानलसंतप्त इति। संतापे हेतुमाह। जननेति।
आदिशब्देन व्याध्यादयो गृह्यन्ते। संतप्तस्यैव गुरूपसर्पणमित्यत्र दृष्टांतमाह। दीप्तशिरा इति। अग्निदग्धमस्तको हि

श्रीराम।
श्रीशिवः।

हि निवृत्तिकामोऽयं झटिति यथा शीतलं जलं जलराशिमनुसरति। तथा संसारतापत्रयदह्यमानस्तन्निवृत्तिकामः स्वस्वरूपं
जिज्ञासुः संसारनिवर्तकं श्रोत्रियं ब्रह्मनिष्ठं करतलामलकवत्स्वप्रकाशात्मस्वरूपसमर्पकं गुरुसमीपं गत्वा अनुसरति।
मनोवाक्कायकर्मभिः सेवत इत्यर्थः। अस्मिन्नर्थे श्रुतिमुदाहरति। अथ गुरुकृत्यमाह। स प्रवीणो गुरुरेनं शिष्यमुपदिशतीत्य
न्वयः। ननु रहस्यमपि ब्रह्मस्वरूपं कस्मादुपदिशतीत्यत आह। कृपयेति। कृपया व्यतिरेकेण साधनानां तन्नामबादीत्यर्थः।
नन्वखण्डस्य ब्रह्मस्वरूपस्यागोचरत्वेनोपदेष्टुमशक्यत्वात् कथमुपदिशतीत्यत आह। अध्यारोपेति। अखण्डब्रह्मस्वरूप
स्य विधिमुखेनोपदेष्टुमशक्यत्वेपि नेह नानास्ति किंचनेत्यादिश्रुतिमनुसृत्याविद्याकल्पितमिथ्यानानापदार्थानिषेध
मुखेनोपदेष्टुं शक्यत्वात्। अखण्डं चैतन्यमेव पुनः सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिमनुसृत्य लक्षणया विधिमुखेनाप्युपदि
शतीति भावः। तत्र श्रुतिमाह। अस्मिन्नर्थे लौकिकं दृष्टांतमाह। व्यावहारिकेव तत्त्वेनाभिमते रज्जौ अवस्तुभूतसर्प
रोपो नाम रज्ज्ववच्छिन्नचैतन्यस्था विद्या सर्पत्वाभासाकारेण परिणममाना सर्वाकारेणाविवर्त्तते रज्ज्ववच्छिन्नचै
तन्यनिष्ठाविद्योपादानत्वेनतावं सर्पः। किंतु रज्जुरिति विशेषदर्शनोत्तरकालीनाधिष्ठानरज्जुसाक्षात्कारेण ज्ञानेन
निवृत्तौ सर्पभ्रांतिर्निवर्त्तत इत्यर्थः। उक्तमर्थं दार्ष्टान्तिके योजयति। कालत्रयाबाधितमात्मैव वस्तुशब्दार्थः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम। श्रीशिवः।

॥६॥ तत्र वस्तुस्वरूपमाह। अज्ञानेन तज्जन्यव्योमादेर्मिथ्यात्वाद्दृश्यत्वात्सावयवत्वाद्विकारित्वात्सापेक्षत्वादित्यादिहेतु
भिर्न वस्तुत्वमित्यर्थः। एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्य रूपं तावदाह। किमिदं सद्रूपमसद्रूपं वा। नाद्यः। तस्य श
शविषाणतुल्यत्वेन तुच्छत्वात्। नापि द्वितीयः। असतः कारणत्वानुपपत्तेरित्यादिहेतुभिः सत्त्वेनासत्त्वेन वा निरूपयि
तुं न शक्यत इत्यत आह। अनिर्वचनीयमिति। नन्वज्ञानस्यानिर्वचनीयत्वे सर्वथा ज्ञातुमशक्यत्वात्तदभावप्रसंगमाश
ङ्क्याह। त्रिगुणात्मकमिति। अजामेकामित्यादिश्रुतिभिः सत्त्वरजस्तमोगुणात्मत्वप्रतिपादनादित्यर्थः। नन्वेवमजस्याज्ञा
नस्य श्रुतिसिद्धस्य व्योमादिरूपेण विततस्य सत्त्वस्यावभासमानत्वेन संसारानिवृत्तिमाशंक्याह। ज्ञानविरोधीति। एतादृश
मप्यज्ञानमात्मसाक्षात्कारेण निवर्तत इत्यर्थः। तदुक्तं भगवता। दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्र
पद्यन्ते मायामेतां तरन्ति ते इति। ज्ञानाभाव एवाज्ञानमिति तार्किकमतं निराकरोति। भावरूपमिति। त्रिगुणात्मकभाव
रूपत्वेपि इदमित्थमेवेति … निर्वक्तुं न शक्यत इत्यत आह। यत्किंचिदिति। किमप्यवाच्यम् … नापद्यते ॥६॥
इत्यर्थः। अनिर्वचनादिभावरूपाज्ञानसद्भावेनुभवमेवोदाहरन्प्रदर्शयति। अहमज्ञो मामहं न जानामीत्यनुभवो …
स एव प्रमाणमित्यर्थः। तस्यैवोपष्टंभकत्वेन श्रुतिमुदाहरति। अज्ञानेनावृतं … इदमज्ञानमिति। वस्तुतोऽज्ञानस्यैकत्वे

श्रीराम। श्रीशिव।

धिसमष्ट्यभिप्रायेणैकमिति व्यवह्रियते। व्यष्ट्यभिप्रायेणानेकमित्यर्थः। एतदेव प्रपंचयितुं प्रतिजानीते। तथाहि
यथा वृक्षाणां समुदायविवक्षया वनमित्येकत्वव्यपदेशः। यथा वा बहूनां जलानां समुदायविवक्षया जला
शय इत्येकत्वव्यपदेशः। तथानंतःकरणोपाधिभेदेन नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समुदायविवक्षया
अज्ञानमित्येकत्वव्यपदेश इत्यर्थः। अस्मिन्नर्थे श्रुतिं प्रमाणयति। नानाजीवगतनिष्ठांतःकरणस्य व्यष्ट्युपाध्यपे
क्षया समष्ट्युपाधेरस्यैवैक्यं प्रदर्शयति। विगतरागादिदोषसत्त्वकार्यप्रपंचस्य जगत्कारणत्वात्तस्य सत्त्वशु
द्धसत्त्वप्राधान्यमिति भावः। तत्समष्ट्युपाधिप्राधान्येनेश्वरत्वं …
यति। एतत्समष्ट्यज्ञानोपहितं चैतन्यं सर्वस्यावभासकत्वात्सर्वज्ञत्वेन सर्वेश इत्युच्यते। सर्वेषां जीवानां क
र्मानुरूपेण फलप्रदातृत्वेनेश्वर इत्युच्यते। तथा सर्वेषां जीवानां प्रेरकत्वेन नियंतेत्युच्यते। प्रमाणागोचरत्वादव्यक्त इ
त्युच्यते। तथा सर्वेषां जीवानामंतर्हृदये स्थित्वा बुद्धिनियामकत्वेनांतर्यामीत्युच्यते। सर्वस्यावभासकत्वात्मकप्र
पंचस्य विवर्ताधिष्ठानकारणत्वेन जगत्कारणत्वमिति व्यपदिश्यत इत्यर्थः। उक्तेर्थे श्रुतिमाह। अत्र प्रमाणमाह।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
श्रीशिवः।

॥८॥

इदानीं तस्यैवेश्वरस्य समुदायोपाधिनैव कारणशरीरत्वमानन्दमयकोशत्वं सुषुप्त्यवस्थावैशिष्ट्यं च लभत इत्याह
कारणशरीरत्वे हेतुमाहाखिलेति। आनन्दमयत्वे हेतुमाह। आनन्दप्रचुरत्वादिति। कारणत्वावस्थायां प्रकृतिपुरुष
मात्रव्यतिरिक्तस्य सकलकार्यप्रपंचस्याभावादानंदबाहुल्यमिति कोशत्वे युक्तिमाह। आच्छादकत्वादिति। शरीराद्या
दकवर्मवदात्माच्छादकत्वादज्ञानस्य कोश इति व्यवहार इत्यर्थः। ननु तथापि कारणत्वोपाधेरज्ञानस्य सुषुप्तित्वं कु
त इत्यत आह। सर्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वात् सुषुप्तित्वमित्यर्थः। ननु स्थूलसूक्ष्मप्रपंचलय
स्थानस्य कथं सुषुप्तित्वमित्याशंक्य संज्ञाभेद इत्याह। यतः कारणात् सुषुप्तित्वम्। अत एव पंचीकृतभूतकार्यस्य
स्थूलप्रपंचस्य जाग्रदवस्थाविशिष्टस्यापंचीकृतभूतकार्यस्य सूक्ष्मस्य प्रपंचस्य स्वप्नप्रपंचस्य विशिष्टस्य लयमित्यपि व्य
वह्रियत इत्यर्थः। समष्टिरूपाज्ञानं सप्रपंचं निरूप्येदानीं व्यष्टिभूतमज्ञानं सप्रपंचं निरूपयितुं दृष्टान्तेन तावद्दर्श
यति। यथा वनस्य वृक्षसमुदायस्य वनत्वेनैकरूपेणैकत्वव्यवहारेऽपि प्रत्येकं वृक्षत्वविवक्षया वृक्षा इति बहुवचनान्ता
तिष्ठंतीति बहुत्वव्यवहारः। यथा वापीकूपतडागादिषु समुदायविवक्षया जलाशयत्वेनैकत्वव्यवहारेऽपि प्रत्येकं वा ॥८॥

श्रीराम।
श्रीशिवः।

प्यादिविवक्षया बहूनि जलानि तिष्ठंतीति बहुत्वव्यवहारस्तथा सकलप्रपंचकारणस्याज्ञानस्य समुदायरूपेणैक
त्वेऽपि अहंकारादिकारणीभूतानां जीवगतानामज्ञानानां प्रत्येकं विवक्षया बहुत्वव्यवहार इत्यर्थः। अस्मिन्नर्थे श्रुतिं प्र
माणयति। ननु तथाप्येकस्यैवाज्ञानस्य तदवच्छिन्नचैतन्यस्य वा व्यष्टिसमष्टिता भेदविवक्षया व्यष्टित्वम् उत्कृष्टादि
वत्। अभेदविवक्षया समष्टित्वं च स्यादिति वदित्यर्थः। न च महाप्रलयकालीनसमष्ट्युपाधिभूतविशुद्धसत्त्वप्रधाना
कृत्यप्रकृतेः सकाशाद्दैनंदिनप्रलयकालीनव्यष्ट्युपाधिभूतजीवप्रकृतेर्भेद इत्यर्थः। इयं जीवगतसुषुप्त्यवस्था
पन्नाहंकारादिविक्षेपसंस्कारादिरूपा निकृष्टोपाधित्वेन मलिनसत्त्वप्रधानेत्यर्थः। अनेनोपाधिना प्राज्ञत्वं चैतन्यं ल
भ्यत इति। अत्रोपपत्तिमाह। ईश्वरगतस्याज्ञानस्य जीवगताहंकारादिविक्षेपसंस्कारादिरूपाज्ञानस्य च वस्तुत एक
त्वेन तदवभासकेश्वरचैतन्यजीवचैतन्ययोरप्येकत्वमित्यर्थः। सोऽयं जीवचैतन्यस्य प्राज्ञत्वं साधयति। संस्काररूपास्य
ष्टोपाधितया नाहाव्यक्तत्वेनातिप्रकाशत्वाभावात्। प्राज्ञत्वमस्येत्यर्थः। यथा जगत्कारणेश्वरोपाधेः कारणशरीर
त्वम्। आनंदप्रचुरत्वेन चानन्दमयकोशत्वं इष्टं तेनैव कोशत्वम्। तथा एतत्सर्वं तावत् तस्येन प्राज्ञत्वेनास्यापीति हि श
ति। अहंकारादीति। प्रलयकाले हिरण्यगर्भादिप्रपंचोत्पादकेश्वरस्य तत्प्रकृतिवत्सुषुप्तिकालेऽहंकारादिशरीरोत्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम। श्रीशिव।

प्र

दकसंस्कारनमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वमुक्तिरपि तद्विषयाभावेनव्यासंगाभावादानन्दव्याकृत्या

॥ ८ ॥ दात्मा खादकत्वो भोक्तृत्वं च प्रत्यभिज्ञेति भावः। ननु स्थूलसूक्ष्मशरीरत्रयस्थानस्य कथं सुषुप्तिशब्दवाच्यमित्याशंक्य

पर्यवसानाभेदान वस्तुभेद इति यत्तद्वन्तत्र भ्रान्तिमाह। अत एव पंचीकृतस्थूलशरीरस्य व्यावहारिकस्यापंचीकृतसूक्ष्म

शरीरे प्रातिभासिके प्रविलापितत्वात्तस्यापि प्रातिभासिकस्य स्वप्नप्रपंचस्य स्वकारणे ज्ञाने लीनत्वात्सर्वोपरत

तिरित्यर्थः। तथा चोक्तम्। जये केन स्यात्तद्धर्मा द्रवाद्याः स्युस्तरंगके। तस्यापि विलये लीने तिष्ठन्ते तेऽपि यथा तथा। २

व्यावहारिकजीवस्य जयस्साक्षिप्रातिभासिके। तदत्र वेत्स्विदानन्दपर्यवसायंति साक्षिणीति २ ननु प्रत्यक्षाद्येवांत ॥ ८ ॥

करणात दुःखाभावेनानन्दव्याकृत्याभावादानन्दव्याकृत्यसद्भावे प्रमाणाभावमाशंक्य परिहरति। यथा स्वच्छत्वेनांत

करणस्य वृत्तिरंगीक्रियते। तथाचैतन्यस्य प्रदीप्तज्ञानस्यापि सूक्ष्मा वृत्तयः स्वीक्रियंते। तथा चेश्वरः स्वकीयाज्ञान

वृत्तिभिः स्वानन्दव्याकृत्यं तावत्स्वेनानुभवतीति भावः। अत एवोपचयं भवत्येन श्रुतिमवतारयति। अत्र स्यापि ज्ञानंदो

विन्दोपाभावोपचरितमेवान्यत्प्रज्ञानवृत्तिभिरवगच्छतीत्यानन्दभुक्। चेतन्यात्मस्वरूपावबोधः स एवावरण

शक्तिसहितो मुखं यस्य स चेतो मुखः प्राज्ञ। प्रकृष्ट स्वयंप्रकाशस्यानन्दो मानिनः अज्ञानसंज्ञितज्ञानवृत्तिरूपावबोधो यस्य स प्राज्ञः।

श्रीराम। श्रीशिव।

उत्थावस्थादुःखाभावेनावगम्यत्वोक्तिर्जीवः। उत्तरकालीनसुखस्वापनामर्शोत्पत्तिरपि कर्तृत्वभक्तत्वव्याकृत्यसद्भावे प्रमाणमित्या

हा। सुखमहमस्वाप्समित्यानन्दपरामर्शः। न किंचिदवेदिषमितिज्ञानपरामर्शः। तथा च सुषुप्तिदशायां प्रत्यक्षाजेव प्राज्ञेश्वरयोरज्ञान

हा सुखमहमस्वाप्समित्यानन्दपरामर्शः इदानीमीश्वरगतमज्ञानं स्वजीवगतसंस्कारमात्रावशिष्टाज्ञानस्य चसमष्टिव्यष्ट्यभिप्रायेण

वृत्तिमानानन्दमनुभवत एवेत्यर्थः। इदानीमीश्वरगतमज्ञानं ज्ञानस्वजीवगतसंस्कारमात्रावशिष्टाज्ञानस्य भेदं दृष्टांतमुखेन दर्शयति। ईश्वरस्य

भेदभानेऽपि वस्तुभेदो नास्तीत्येतत्सदृष्टांतमाह। उक्तोपाधिद्वयद्वारेणाईश्वरप्राज्ञयोरन्यभेदं दृष्टांतमुखेन दर्शयति। ईश्वरस्य

यतो वच्छिन्नाकाशवत्प्राज्ञस्य वृक्षावच्छिन्नाकाशवत् तथा च स्फुटं जलाशयोपाध्यवच्छिन्नाकाशयतनदं तत्प्रतिबिम्बाकाशवत्

कारणोपाध्यवच्छिन्नेश्वरस्य कार्योपाध्यवच्छिन्नप्राज्ञस्य च वस्तुतोऽभेद एवेत्यर्थः। तत्र प्रमाणमाह। तथा चोक्तमावार्यैः।

॥ कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः। कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यत इति। उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ स

प्रपंचं निरूप्येदानीं तदनवच्छिन्नं तुरीयं यच्चैतन्यं तदनन्तमाह। यथा स्फटिकवनोपाध्यवच्छिन्नाकाशयोरुपाधिरूपमवच्छिन्नौ

अव्यवच्छिन्नाकाशयोरुपाधिरूपमेवाकाशस्य तद्वत् मयाधारतयानवच्छिन्नत्वात्तुरीयमत्यय। तथा कार्यकारणोपाधितदवच्छि

अव्यवच्छिन्नाकाशयोरुपावमेवाकाशस्य तदुभयाधारतयानवच्छिन्नत्वाद्धि तुरीयमन्यत इत्यर्थः। अतश्चैतन्यस्य तुरी

नं चैतन्यद्वयाधेयत्वापातदाधारभूतं तदनवच्छिन्नं सर्वव्यापि चैतन्यं विश्व प्रभृतितुरीयमन्यत इत्यर्थः। अतश्चैतन्यस्य तुरी

यत्वं तन्व्यमोगविश्वाधपेन्द्रापेतिदुष्टव्यम्। अस्मिन्नर्थे श्रुतिं संपादयति। आदिपदात्त्रिषु धामसु यद्भोग्यं भोक्ता भोग

श्च यद्भवेत्। तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिव इत्यादिश्रुत्यंतरम्। एतदेव विश्वं च चैतन्यं तदेव परोक्ष चैतन्यद्वयेन

सहैकत्वविवक्षायां महावाक्यस्यार्थत्वं लभते। भेदविवक्षायां वलक्षणत्वं लभतइत्याह। तथा सर्वचैतन्यानां चैतन्येनरूपेणैकत्वेऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
श्रीशिव:।
॥८॥

आवच्छिन्नानवच्छिन्नत्वेन रूपेणावाच्यत्वे संभवत इति भावः। अथेदानीं स्वप्रकाशचिद्रूपस्यात्मनः कथं कुंठितप्रकाशत्वं
कथं वा असंगोदासीनस्यात्मनः आकाशादिप्रपंचजनकत्वमित्येतन्मताविरोधपरिहाराय अज्ञानस्य शक्तिद्वयमिति रूपयति। ए
तदेव नाम तो निर्दिशति। आवरणविक्षेपकनामकमिति। आवरणशक्तिस्तावत् सच्चिदानन्दस्वरूपमाच्छादयतीत्यावरणशक्तिः।
ब्रह्मादिस्थावरान्तं जगज्जन्मद्युत्पद्य नामरूपात्मकं विक्षिपतीति विक्षेपशक्तिरिति शक्तिद्वयमज्ञानस्येत्यर्थः। नन्वप
रिच्छिन्नस्य स्वप्रकाशचिद्रूपत्वेन सर्वाधिकरणस्य स्वरूपस्यात्मनः परिच्छिन्नेनानित्येन जडेन मोहरूपेण व्यापकेनाज्ञान
शक्तिविशेषेण कथमावरणमित्याशंक्य वस्तुतोऽज्ञानस्यात्माच्छादकत्वाभावेऽपि प्रमातृबुद्धिमात्राच्छादकत्वेनाज्ञानस्या
त्माच्छादकत्वमुपचारादुच्यत इत्याह। यथा अस्वल्पोऽपि मेघोऽनेकयोजनविस्तीर्णमादित्यमण्डलमवलोकयितृपुरुषदृष्टिमा
त्राच्छादकत्वेनाच्छादयतीव। तथाऽज्ञानं परिच्छिन्नमप्यपरिच्छिन्नमात्मानमवलोकयितृबुद्धिमात्राच्छादकत्वेनात्मान
माच्छादयतीत्युपचारादुच्यत इत्यर्थः। अस्मिन्नर्थे वृद्धसंमतिमाह। इयमेवावरणशक्तिरात्मनो बुद्धिभेदजनकत्वेन सं
सारहेतुरिति भावः। अत्र रूपं दृष्टान्तमाह। यद्वा असंगोदासीनस्यात्मनः कथं जगत्कारणत्वमिति तन्निराकर्तुं विक्षेप
शक्तिस्वरूपमाह। यथाऽज्ञानं विषयकमज्ञानं सर्पमुत्पादयति। तथात्मकविषयकमज्ञानमपि स्वावच्छिन्ने आत्मनि
विक्षेपशक्तिप्रभावेन आकाशादिप्रपंचमुत्पादयतीत्यर्थः। अस्मिन्नर्थे ग्रंथांतरसंमतिमाह। तच्छक्तिमानात्माव

श्रीराम।
श्रीशिव।

नायं नात्मकप्रपंचस्य निमित्तकारणमुपादानकारणं वा। नाद्यः। दण्डादिवत्तस्य कार्यव्यापित्वं न स्यात्। आत्मनस्तत्सृष्ट्वा तदे
वानुप्राविशदिति श्रुत्या स्वकार्यव्यापित्वश्रवणात्। न द्वितीयः। आत्मचैतन्यस्य जडस्य प्रपंचस्य चैतन्योपादानकत्वासंभवात्।
उपादानत्वे च कार्यकारणयोरभेदेन प्रपंचस्यापि चैतन्यरूपत्वप्रसंगात् अनित्यत्वं न स्यादित्याशंक्य जडप्रपंचं प्रत्यात्मनः चैतन्य
स्य प्राधान्येन निमित्तत्वं स्वाज्ञानप्राधान्येनोपादानत्वं च संभवतीत्याह। यथा अयस्कान्तसान्निध्यानेन जडमयं लोहं चेष्टते
तथा चैतन्यसंनिधानेन जडमयमज्ञानं चेष्टते इत्यज्ञानविकारं प्रति चैतन्यस्य निमित्तत्वम्। जडाकाशादिकार्यं प्रति माया
याः साक्षादुपादानत्वे मायाविनः ईश्वरस्यापि परंपरयोपचारादुपादानत्वं न विरुध्यत इत्यर्थः। यद्वा चैतन्यस्य निमित्त
कारणत्वे कार्यानुप्रवेशो न स्यादिति। तन्न। कारणस्य कार्यानुप्रवेशनियमस्योपादानकारणत्वविषयत्वेन निमित्तकारण
त्वविषयत्वाभावात्। तत्सृष्ट्वेत्यादिश्रुतेरुपादानकारणपरत्वात्। यद्युच्येत आत्मनः उपादानकारणत्वे प्रपंचस्या
नित्यत्वं न स्यादिति। तदपि न। तस्य परिणामविषयत्वेनापि विवर्तविषयत्वाभावात्। प्रपंचस्य ब्रह्मविवर्तत्वात्। विवर्त
त्वं च स्वस्वरूपापरित्यागेन स्वरूपान्तरप्रदर्शकत्वम्। यथा रज्ज्ववच्छिन्नचैतन्यनिष्ठाज्ञानशक्तेरपि चैतन्यस्य स्वरूपाप
रित्यागेन स्वरूपान्तरप्रदर्शकत्वं सर्पः। तथा ईश्वरचैतन्यनिष्ठाज्ञानशक्तेरपि चैतन्यस्य स्वरूपापरित्यागेन आकाशा
स्वरूपान्तराकारेण प्रदर्शकत्वम्। आकाशादिप्रपंचस्यापि मिथ्यात्वात्। न चैवमज्ञानस्य मिथ्यात्वेन तदुक्तबंध
एतावता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
श्रीशिव।

पृ ३

॥१०॥ मोन्दकोरधिमिथ्यात्वप्रसंग इति वाच्यम्। इत्याशंक्याह। तदुक्तं भगवता। प्रकृतेश्च इति व्याख्यानेन मयकगुणतो येनव
स्तुतः गुणोस्य मायाख्यत्वान्नियमोन्दोनवं येन मित्यनेमिनिति विस्तरेण। एकस्यैवात्मनो निमित्तोपादानकारणत्वे दृष्टां
तमाह। यथा लूतातंतुः सोत्पाद्यमानतंतूनां कार्यप्रतिस्वचैतन्यप्रधानतया निमित्तम्। चैतन्यसन्निधानव्यतिरेकेण
जडस्वदेहस्य स्वतः शरीरस्य तंतुजनकत्वासंभवात् स्वशरीरप्राधान्येन उपादानं च भवति। स्वशरीरस्य सान्द्रतानंतुजनक
त्वासंभवात्। शरीरस्य सान्द्रतानंतु उपादानत्वेन तदवच्छिन्नचैतन्यस्याप्युपादानत्वेनोपचारात्। एवमीश्वरस्यापि
स्वचैतन्यप्रधानतया निमित्तत्वं स्वोपाधिप्रधानतयोपादानत्वं च भवतीत्यर्थः। इदानीं विक्षेपशक्तिरूपस्य मायांशस्याकाशा
देर्जननात् तमोगुणप्रधानविक्षेपशक्तिमदज्ञानावच्छिन्नचैतन्यस्यैवाकाशादिप्रपंचजनकत्वमिति भावः। तस्मिन्नर्थे श्रु
तिं प्रमाणयति। एतेनार्थात् सांख्यनैयायिकपक्षौ निरस्तौ। शक्तेरज्ञानस्य शक्तिमत्परतंत्रत्वात् स्वतंत्रस्य तस्य केवलस्य ॥१०॥
जडस्याज्ञानस्य जगत्कारणत्वानुपपत्तेः ईश्वरेण सृष्टम्। वचनानुपपत्तेश्च नानुमानमित्यादिन्यायनिरस्तत्वाच्च। यत
मात्रेण स्वकृतदोषत्वात् सत्त्वासत्त्वानपायात्। अभिन्ननिमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्यायविरोधाच्च। यतो वा इमानि
भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। सदेव सोम्येदमग्र आसीत्। एतस्माज्जायते प्राणो मनः स
र्वेन्द्रियाणि च। अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते। बीजं मां सर्वभूतानामित्या

श्रीराम
श्रीशिव।

दिश्रुतिस्मृतिभिरीश्वरस्यैव जगत्कारणत्वप्रतिपादनात्। ननु आकाशादिप्रपंचोत्पादकचैतन्यावच्छेदकाज्ञाने कुतस्तमःप्राधा
न्यमित्याशंक्याह। कारणगुणा हि कार्यगुणानारभन्ते इत्यादि इति भावः। ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुणात्मक
त्वादज्ञानस्य कथं तमोगुणमात्रप्राधान्येनाकाशादिजनकत्वमित्याशंक्याह। तदानीं सत्त्वरजोंऽशयोः सत्त्वादयस्त्रयोऽपि
गुणास्तारतम्येन कारणप्रक्रमन्यायेन तेष्वाकाशादिषु प्रपंचभूतेषु तन्नाधिक्येनाप लाइत्यर्थः ॥
इमान्येव सूक्ष्मशरीरादिकारणभूतानि अपंचीकृतानि सूक्ष्मरूपपंचभूततन्मात्राणीत्युच्यन्ते इत्याह। तदुक्तम्।
प्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति। वचनादपि अपंचीकृतभूतेभ्यो
ऽपंचीकृतसूक्ष्मशरीराणि। पंचीकृतस्थूलभूतेभ्यः स्थूलशरीराणि चोत्पद्यन्ते इत्याह। सात्त्विकांशादाकाशाच्छ्रो
त्रमुत्पद्यते। सात्त्विकांशाद्वायोस्त्वगिन्द्रियम्। सात्त्विकांशात्तेजसश्चक्षुः। सात्त्विकांशाज्जलाज्जिह्वा। सात्त्वि
कांशात्पृथिव्याः घ्राणम्। ज्ञानेन्द्रियाणीति व्यस्तोत्पत्तिमित्याह। बुद्धेर्लक्षणमाह। प्रत्येकाहमिति निश्चय
यात्मिकैवान्तःकरणवृत्तिरेव बुद्धिरित्यर्थः। मनसो लक्षणमाह। अहं विद्धूपादेहोऽयमिति संशयात्मिकां तत्करणे
णवृत्तिरेव मन इत्यर्थः। अन्तःकरणस्य बुद्धिमनसोरन्तर्भावमाह ॥
मनइ

९

श्रीराम
श्रीशिव।

१० यद्यप्यन्नच्छन्नत्वेन वर्त्तुलामेकत्वं तथाप्येकस्यैव उष्ठेबस्य पावकः पाठकद्दत्यादिव्यक्तिभेदान्देहदेहस्याप्यंतःकरण
स्यानि स्वसंशयस्मनरणं हेज्ञानक्रिषयभेदै भुञ्ज्यादिभेदइत्यर्थः। भुज्यादीनामुत्पत्तिप्रकारं दर्शयति। एतेषांचतुर्णांसा
त्विकांशेभ्योमिलितेभ्यः। उत्पन्नो विविधनाम। भुज्यादीनां प्रकाशात्मकत्वात्सात्विकांशमूलतकार्यत्वमित्यर्थः। भुध्देविशिष्टानमयको
शत्वं दर्शयति। भुद्धेः सत्वकार्यत्वाद्दशानेन्द्रियसाहित्येन प्रकाशाधिक्याद्विज्ञानमयत्वम्। आत्माच्छादकत्वाद्वको
शत्वमित्यर्थः। विज्ञप्रतिबिंबितविज्ञानविशिष्टात्मनो जीवत्वं दर्शयति। न भ्रमपक्षिपणवद्व्यानेपितं वैतन्यं वस्तुतोऽ
कर्तृत्वभोक्तृत्वनित्यानन्दापरिच्छिन्नमक्रियमपि भोक्तृत्वकर्तृत्वदुःखित्वपरिच्छिन्नत्वक्रियावत्त्वाद्यभिमानेन स्वर्गादिलो
कांतरगामित्वव्यावहारिकजीवत्वं वलभत इत्यर्थः। मनोमयकोशं निरूपयति। सत्वगुणप्रधानं मनः सत्वगुणांशे
भ्यो जातः श्रोत्रादिज्ञानेन्द्रियैः सहितं सन्मनोमयकोश इत्यर्थः। अत्र तु मनसः सत्वोपहितत्वेऽपि विकानेच्छारूपत्वात् संकल्पविकल्पा
त्मकत्वेन बुध्यपेक्षया ज्ञानाधिक्यान्मनोमयत्वम्। आत्माच्छादकत्वात्कोशत्वमिति भावः। कर्मेन्द्रियाण्युद्दिशति। एतेषां पूर्व
नोक्तसाधनापेक्षामाह। भूतानां त्रिगुणात्वेपि रजोगुणांशेभ्यो भूतेभ्यो वागादीनि पंचकर्मेन्द्रियाण्युत्पद्यन्ते।
रजोगुणप्रधानादाकाशाद्वागुत्पद्यते। रजोगुणप्रधानवायोः पाणीन्द्रियं। रजोगुणप्रधानाग्नेः पादेन्द्रियम्। रजो

श्रीराम।
श्रीशिव।

रजोगुणप्रधानात्पृथिव्याः गुदेन्द्रियमुत्पद्यत इत्यर्थः। वायुत्वादिद्दिशति। तत्रादौ देवं प्राणस्य लक्षणमाह। ऊर्ध्वगमनशी
लो नासाग्रस्थायी वायुः प्राण इत्यर्थः। अपानस्य लक्षणमाह। अधोगमनशीलः पाय्वादिस्थायी वायुरपान इत्यर्थः। व्यानस्य ल
क्षणमाह। सर्वनाडीगमनशीलोऽखिलशरीरस्थायी वायुर्व्यान इत्यर्थः। उदानस्य लक्षणमाह। कंठस्थायी वायुरुदान इत्यर्थः।
सानीगमव्यगतान्नरसादिनेतावायुः समान इत्यर्थः। प्राणादीनां वायुत्वेन स्वरूपतोऽपि क्रियाभेदेन भेद इत्यर्थः। कापिलमतानुसारि
सांख्यास्तुः क्रियाभेदेनान्येपि पंचवायवः संतीति वदंतीत्याह। ते च नामानिर्दिशति। नागेत्यादि। तथाहोक्तम्। उद्गारे नाग आ
ख्यातः कूर्म उन्मीलने स्मृतः। कृकलः क्षुतकृज्ज्ञेयो देवदत्तो विजृंभणे। न जहाति मृतं वापि सर्वव्यापी धनंजय इति। वेदांति
नस्तु नागादीनां प्राणादिष्वंतर्भावं वदंतीत्याह। प्राणादिपंचकान्तर्भावात्पंचैवेत्याह। अपंचीकृतेभ्यो महाभूतेभ्यो रजः
प्रधानेभ्यः प्राणादयो जायंत इत्यर्थः। एतेषां प्राणादीनां प्राणमयकोशत्वमाह। आत्माच्छादकत्वात्कोशत्वं प्राणमयत्वं भव
तीत्याह। प्राणादीनां रजःप्रधानभूतकार्यत्वेनेतिप्रमाणमाह। प्राणादीनां क्रियात्मकत्वाद्रजःकार्यत्वमित्यर्थः। एतेषु पंचसु को
शेषु मध्ये बुद्धिविज्ञानमयमनोमयप्राणमयकोशानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदेन कर्तृकरणक्रियारूपत्वं दर्शयति
ननु हेतुमाह। इदमेव कोशत्रयं सूक्ष्मशरीरमित्युच्यत इत्याह। अस्य समष्टित्वे हेतुमाह। एकबुद्धीति। वनादयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
श्रीशिव।
११

शिमात्रस्यपावन्त्यनंतानिसूक्ष्मशरीराणितेषांसर्वेषांसूक्ष्मशरीराणांसूत्रात्मनाहिरण्यगर्भात्वेनस्वीयैकत्वमवि
षयीकृतत्वात्समष्टित्वमित्यर्थः। तत्रदृष्टांतमाह। वनवदित्यादि। अस्यैवसूक्ष्मशरीरस्यव्यष्टित्वंदर्शयति। अनेकेषां
जीवानांप्रत्येकंस्वस्वलिंगशरीरस्यस्वस्वबुद्धिविषयत्वेनानेकबुद्धिविषयतयाव्यष्टित्वमित्यर्थः। तत्रदृष्टांतमाह।
वृक्षवदित्यादि। उक्तसमष्ट्यवच्छिन्नचैतन्यस्यसूत्रात्मत्वादिसंज्ञादर्शयति। तत्रहेतुमाह। सर्वप्राणिशरीरेष्वनुस्यूत
त्वाद्विद्यमानत्वादित्यर्थः। हेत्वंतरमाह। ज्ञानेच्छाक्रियाशक्तिमत्कोशत्रयोपाध्यवच्छिन्नत्वादित्यर्थः। विज्ञानमयादिको
शत्रयस्यशरीरत्वंदर्शयति। अस्यसूत्रात्मनहिरण्यगर्भस्यविज्ञानमयादिकोशत्रयंसूक्ष्मशरीरम्। अस्यस्थूलप्रपं
चापेक्षयासूक्ष्मत्वादित्यर्थः। अस्यैवविज्ञानमयकोशत्रयस्यस्वप्नत्वेयुक्तिमाह। जाग्रत्स्वरूपेणानुभूतस्थूलप्रपंच
विषयवासनामयत्वात्स्वप्नत्वमस्येत्यर्थः। यतःस्वप्नत्वंसूक्ष्मत्वंचअतएवस्थूलप्रपंचलयस्थानमित्युच्यतइत्यर्थः।
विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचैतन्यस्यहिरण्यगर्भत्वंप्रतिपाद्येदानींतद्व्यष्ट्यवच्छिन्नचैतन्यस्यतैजसत्वंनिरू
पयति। तत्रहेतुमाह। व्यष्टिरूपविज्ञानमयादिकोशत्रयमेतैजसस्यापिसूक्ष्मशरीरमितिदर्शयति। अस्यापीति।
सूक्ष्मशरीरत्वेहेतुमाह। स्थूलेति। अस्यापिस्वप्नत्वेहेतुमाह। विश्ववदेतत्वेनानुभूतस्थूलशरीरविषयकवासना

[illegible]

श्रीराम।
श्रीशिवः।

अस्यैवसूक्ष्मशरीरस्यस्थूलशरीरलयस्थानत्वेयुक्तिमाह। जाग्रद्वासनामयत्वात्स्वप्नः। यथापूर्वंप्राज्ञेश्वरायशानज्ञ
तिभिःसुषुप्त्यवस्थायामानन्दमनुभवतः। तथाहिरण्यगर्भतैजसावपिस्वप्नावस्थायांमनोवृत्तिभिर्वासनामयानशब्दा
दीन्विषयाननुभवतइतिदर्शयति। अस्मिन्नर्थेश्रुतिमुदाहरति। अस्यार्थः। विविक्तमेकान्तंसूक्ष्मविषयंभुंक्तेइतिप्रविवि
क्तभुक्। तैजसोऽन्तःप्रज्ञादिभावेनपरिज्ञातंतदेवस्थूलशरीरादिहीनंयस्यतैजसःसंतक्रवलस्याः इत्यर्थः। इदानींविज्ञान
वनल मयादिकोशत्रयस्यसमष्टिरूपस्यतदवच्छिन्नसूत्रात्मनश्चव्यष्टिरूपविज्ञानमयादिकोशत्रयस्यतदवच्छिन्न
तैजसस्यचैतन्यस्यवनवज्जलाशयादिदृष्टान्तद्वयेनाभेदंदर्शयति। समष्टिव्यष्ट्युपाध्योर्वन
वृक्षवज्जलाशयजलवच्चाभेदः। उपाधिद्वयावच्छिन्नचैतन्ययोःसूत्रात्मतैजसयोर्वनवृक्षावच्छिन्नाकाश
वज्जलाशयजलगतप्रतिबिंबाकाशवच्चाभेदइत्यर्थः। सूक्ष्मशरीरोत्पत्तिप्रकरणमुपसंहरति। अथेदानींस्थूलशरी
रोत्पत्तिंनिरूपयितुमुपक्रमते। तुशब्दःपूर्वस्माद्वैलक्षण्यंद्योतयति। पंचीकृतानीति। अपंचीकृतसूक्ष्म[illegible]भूतापेक्षयास्थू
लभूतानिपंचीकृतानीत्यर्थः। पंचीकरणमेवप्रतिपादयितुंप्रतिजानीते। पंचीकरणप्रकारमेवाह। अयमर्थः। सृष्टिका
लेसकलप्राणिपदृष्टवशादीश्वरप्रेरणयाआकाशादयोजातेजोऽबन्नान्यनाद्यविद्यासहायब्रह्मात्मनःसकाशादुत्पन्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
श्रीशिव।
१२

ज्ञाता नानि तान्यपंचीकृतानि सूक्ष्माणि व्यवहारासमर्थानीति कृत्वा तदीयस्पेयोऽत्यापेन्द्रापोव्यवहर्तृ प्राणिज्ञानधर्माधर्म
पेन्द्रापेय तान्येव भूतानि पंचीकृतानि भवंति। तानि च प्रत्येकं द्वैधिव्यमापद्यन्ते। तेष्वाकाशादिषु दशसु भागेषु प्राथमिकान्यं
च भागान्प्रत्येकं चतुर्धा समं विभज्य स्वार्धपरित्यागेन चतुर्णां प्रत्येकं भागानां तेषु संनिवेशेन पंचीकृतानि स्युः। तानि भवंतीति
तस्मिन्नर्थे वृद्धसंमतिमाह। पंचीकरणस्य त्रिवृत्करणप्रतिपादकश्रुत्यंतविरोधमाशंक्य परिहरति। कृतत्रयसृष्टिश्रुतौ
सृष्टिपरिकल्पनत्र्यमित्यत्र भूतमपि भूतद्वयमाश्रित्य भूतपंचकाभिप्रायेणाभूतत्रयसृष्टिप्रतिपादनादविरोधान्नूत्पर्थः। आका
शादिपंचभूतेषु चतुर्धा विभक्तानामन्येषां पंचभूतानां प्रत्येकानुप्रवेशेन पंचीकृतानामाकाशादीनां पंचात्मकत्वापि सेषा
दाकाशादिव्यपदेशोऽनस्यादित्याशंक्य परिहरति। आकाशादीनां पंचानां पंचात्मकत्वे समानेऽपि तेषु पंचभूतेषु नहि
स्वेषानुप्रवेशान्नामभिव्यवहाराः संभवतीत्यर्थः। यद्यपि पंचीकृतान्याकाशादीनि तदानीं स्फुरत्येन स्वस्वकार्यो
त्पादनसमर्थत्वादाकाशेऽव्यक्तरूपेणास्थिताः शब्दोऽभिव्यज्यते व्यक्तो भवतीत्यर्थः। उक्तेभ्यो भूतेभ्यस्त्वनुद्दिष्टभवनो
त्पत्तिप्रकारं दर्शयति। एतेभ्यो भूतेभ्यः समुत्पन्नब्रह्माण्डस्य चतुर्विधशरीराणां तत्तद्भोग्यपानादीनां चोत्प
त्तिर्भवति। चतुर्विधशरीराण्युद्दिशति। तानि चत्वारि दर्शयितुं तेनाति। कर्षुवदन्नाद्यभिष्टि समष्टिभेदं दर्शयति।
व्य

श्रीराम।
श्रीशिव।

तत्पादिविधुसमष्टवेतन्निवृत्तिप्रकारेण च वृद्धसम्मतिमाह। तदुक्तमिति। इतिपूर्वोक्तमिति द्वाजन्तलोऽजपेजाते सति तन्निवृत्त्य
र्थं विनिसंसोधयेद्विजगत नाद्यादिपरित्यागेन विनतञ्छोधयेत्। उक्तं विन्तेयपुनर्भविनं यदा भवति तदा विषयर्थे नाद्यादिना।
विनं शमयेत्। यदि हि सर्वेतांपरित्यक्यं तत्सुखं कुर्यात्। उक्तनागादिकषायसहितं विनं यदा भवेत्तदा विजानीयात्। इयं नागादि
वासनावाच्यविषयप्राधिकानात्यखण्डवतुप्राधिका। अतोऽनेपं समीचीनेतिविविधप्रत्यक्षप्रवणावासनायाः सकाशा
दिवंनिवृत्ता। अतस्त्याज्येयमितिजानीयादित्यर्थः। याद्या समष्टेरखण्डप्राप्तंविनं यदा भवति तदा तद्विनं कषायसं
हितं जानीयात्। तद्विनं पाय त्कालेन नागादिवासनान्तसहितं न भवति तावत्कालं तद्विनं स्वस्थानान्नचालयेदितिकर्वो
ऽतः सविकल्पकसंविषयप्रपंचभावं त्यागजन्यं नास्वादयेन्नानुभवेत्। तत्रयुक्तिमाह। संगदति। यतोऽनिःसंगो वैषयिक
सुखदुःखादिसंगरहितः अतः प्रज्ञया युक्तो भवेत्तस्मिन्नप्रज्ञो भवेदित्यर्थः। तदुक्तं भगवता। प्रजहाति यदा कामान्सर्वान्
पार्थ मनोगतान्। आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यत इति। तस्मादन्नपादिविघ्नाभावविशिष्टविनस्य विन्मा
त्रतया स्वरूपावस्थाने निर्विकल्पकसमाधिरित्यर्थः। अनिधनिर्विकल्पकसमाधेस्तत्त्वरूपादिष्टमार्गेणावधारितिकिंचि
द्विचार्यते। पंचभूमिकोपेत स्वचित्तस्य भूमिकाजयं परित्यागेनाऽ। चरिष्ठभूमिका द्वयं समाधिरिति व्यते। काः ताः
पंचभूमिकाः।

श्रीराम।
श्रीशिव।

न्द्रियं मू ढं विन्द्रियं प्रेमकाग्रं निरुध्दं चेति पंचविधा भूमिकाः। तत्र क्षिप्तं सदा रजोगुणेन बहिर्मुख तमानस्तु चमानं विनान्द्रिय
मित्युच्यते॥ निद्रातन्द्रादिग्रस्तं चित्तं मूढमित्युच्यते। कदाचिद्ध्यानयुक्तं क्षिप्तं भूमनपी ... द्विशिष्टतया
विन्द्रिय प्रविनमित्युच्यते। तत्रान्द्रियमूढयोः समाधित्वशंकैव नास्ति। विन्द्रिप्ते तु चेतसि विन्द्रेपान्तर्गतत्वा दहनान्तर्गत
बीजवद्विनस्यन्मप एव धिमात्सानुप विन समाधिः। एकाग्रतां प्रतनि... भवति। शान्तोदितौ तुल्यप्रत्ययौ विनस्ये
काग्रतापरिणाम इति। तस्यार्थः। शान्तोऽतीतः उदितो वर्तमानः प्रत्ययश्चित्तं तच्छन्ति। अतीतप्रत्ययो यं चरूपार्थंगन्तव्या
नि तमेवार्थं देहादिग्रहतां तदा तावुभौ तुल्यो भवतः। तादृशमेव चित्तस्य परिणामैकाग्रतेत्युच्यते। एकाग्रतापि
चित्तस्य तत्समाधिं सूचयति। सर्वार्थैर्लाग्न तयोः क्षयोदयौ चित्तस्य परिणामः समाधिरिति। रजोगुणेन वा
स्यमानं चित्तं क्रमेण सर्वार्थान्यदार्थान्यपरिगृह्णाति। तस्य रजो गुणनिरोधाय क्रियमाणेन प्रयत्नविशेषेण
दिनेदिने योगिनः सर्वार्थता न्हीयते एकाग्रता चोदेति। तादृशश्चित्तस्य परिणामः समाधिरिति। सूत्रार्थः। तस्य सा
धनेन योगेयमनियमासनप्राणायामप्रत्याहारः। पंचबहिरंगाणि। हिंसादिभ्यो निषेधेभ्यो योगिनं कर्मभ्यो य
मयंतीति निवर्तयंतीति यमाः। अहिंसादयो यमाः। जन्महेतुकाम्यधर्मान्निवर्त्य मोक्षहेतौ निःकामधर्मे नियमयंति

मनसा समाप्तिमयमभा मेवं दीर्घोसंपदमनेम्यो यतिश्चनितवे (margin)

श्रीराम।
श्रीशिव।

यमनियमको न तु क्षाननैरन्तर्येण स्मर्यते। यमास्त्वेतत् सततं न कुर्यान्नित्यमिव मात्रपः। यमान्यतनस्य कुर्वीत नित
यमान्केवलान्भजन्निति तु ध्यानयमनियमौ समीन्द्रय यमबहुलेन प्रयत्नेन बुद्धिमनुसरेद्धीत। आसनप्राणा
याम प्रत्याहारा व्याख्याताः। ध्यानधारणा समाधित्रयं मनोविषयत्वात् सम्प्रज्ञातसमाधेरंतरंगं यमादिकं तु बहिरंगं
। तथायं केनापि भुतेय नार्लजं नेत्र यमनेश्चैव सति वहिरंगं ... नामप्रयत्नात्मनामिप्रयासः कर्तव्यः। मनयाविपानं जदित
नाभौ तिक मृत माने न्द्रियाहंकारविषयाः संप्रज्ञातसमाधेर्बहुधा परंपरिताः। तथा जितेंद्रियमंतर्धानादयो राम
नादिसिद्धिहेतुः तथा मुक्तिहेतुः समाधिर्विनाधियत्वात् स्मामि ... दनः क्रियते। तथा चोक्तं वाशिष्ठे। श्रीराम
उवाच। जीवन्मुक्तशरीराणां कथमात्मविदां वर। शक्तयो नेह दृश्यंते आकाशगमनादिकाः॥१॥ श्रीवशिष्ठ उवा
च। अनात्मविदमुक्तोऽपि सिद्धिजालानि वांछति। द्रव्यमंत्रक्रियाकालयुक्त्याप्नोत्येव राघव॥२॥ नात्मज्ञस्यैष
विषय आत्मज्ञो ह्यात्ममात्रदृक्। आत्मनात्मनि संतृप्तो नाविद्यामनुधावति॥३॥ ये केचन जगद्भावास्तान
विद्यामयान्विदुः। कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति॥४॥ द्रव्यमंत्रक्रियाकालयुक्तयः साधु सिद्
धसिद्धिदाः। परमात्मपदप्राप्तौ नोपकुर्वंति काश्चनेति॥५॥ आत्मविषयत्वं संप्रज्ञातसमाधिर्वाक्तना

मनसाः समाधिलाभप्रयत्नसंपद। ... (margin)

श्रीराम। १५
श्रीशिव।

अथ पंचभूमिकारूपश्चित्तस्य निरोधलक्षणः समाधिर्निरूप्यते । तं च समाधिं सूत्रयति । व्युत्थाननिरोधसंस्कार
योरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः इति व्युत्थानसंस्काराः समाधिविरोधिनस्ते च नि
षिद्धहेतुनाभ्यासप्रयत्नेन प्रतिदिनं प्रतिक्षणं चाभिभूयंते । तद्विरोधिनश्च संस्काराः प्रादुर्भवंति । तथा सति निरोध
एकैकस्मिन्क्षणे चित्तमनुगच्छति । सोयमीदृशश्चित्तस्य परिणामो भवतीति वदता तदा स्वसंस्कारात समाधिरुक्त इत्यर्थः ।
एतत्समाधिद्वयं जीवन्मुक्तस्यैव संभवति नान्यस्येति मनसि निधाय प्रश्नमे जीवन्मुक्तस्वरूपं प्रतिपादयितुं प्रति
जानीते । अथेत्यनेन । तस्य लक्षणमाह । जीवन्मुक्तो नामेत्यादिना ब्रह्मनिष्ठ इत्यंतेन । स्वात्मविलक्षणं यथाहि
तो ब्रह्मनिष्ठो जीवन्मुक्त इति तस्य लक्षणम् । जीवितः शुभस्य हि कर्तृत्वभोक्तृत्वसुखदुःखलक्षणस्तो ऽवि
ऽऽपरिचितधर्मः स्वस्वरूपत्वाद्ब्रह्मो भवति । तेन रहितः परित्यक्तबंधनः ब्रह्मनिष्ठानंदैकपरतया स्वस्य ब्र
ह्मनिष्ठः जीवन्मुक्तस्वरूपं । स्वरूपत्वं यथाहि त्वमेवमाह । स्वस्वरूपेति । शुभशुभानि स्वानुभवैकवेद्यत्वेनै
त्यविदानेन स्वरूपाणि तत्कार्यसंचितकर्मादीनामपि बाधितत्वात् । नन्वेतादृशजीवन्मुक्तस्य देहेन्द्रियप्रा
णाभिमानमस्ति नवेत्याशंक्य दग्धपटन्यायेन इंद्रजालवन्निर्मितसंस्थूलसूक्ष्मदेहादिकं बाधितानुवृत्त्याभिमानात्ये
नमानेपि परमार्थतः सम्माने नैवास्तीत्याह । रामपरीत्यादिना नपश्यंतीत्यंतेन ।

K K S U LIBRARY RAMTEK 441 106 M-1332 Dist. Nagpur

74

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 15:24
,TRANSFERRED=2020/10/23 at 15:26:38
,PAGES=14
,TYPE=STD
,NAME=S0004496
,Book Name=M-1331-MUNIYADI VYAKHYAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection